
संस्कृत-पत्रिका | चतुर्थसंकलनम् |जुलैत: दिसम्बरपर्यन्तम् २०२१



# चिन्मय

# निर्झरिणी

चिन्मयविद्यालयः, बोकारो, झारखण्डः



*Painting by Prayag, a student of Chinmaya International Residential School.

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन, तस्मै श्रीगुरवे नमः।।

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन, तस्मै श्रीगुरवे नमः।।

# शुभसंदेशः



स्वामिनी संयुक्तानंदा जी

आचार्या

चिन्मयमिशन, बोकारो, झारखण्डः

संस्कृतवाङ्मयं विश्ववाङ्मये स्वस्य अद्वितीयं स्थानम् अलङ्करोति। संस्कृतस्य प्राचीनतमग्रन्थाः वेदाः सन्ति। वेद-शास्त्र-पुराण-इतिहास-काव्य-नाटक-दर्शनादिभिः अनन्तवाङ्मयरूपेण विलसन्ती अस्ति एषा देववाक्। न केवलं धर्म-अर्थ-काम-मोक्षात्मकाः चतुर्विधपुरुषार्थहेतुभूताः विषयाः अस्याः साहित्यस्य शोभां वर्धयन्ति अपितु धार्मिक-नैतिक-आध्यात्मिक-लौकिक-पारलौकिकविषयैः अपि सुसम्पन्ना इयं देववाणी।

यथा संस्कृतमस्माकंमाता तथैव चिन्मयः विद्यालयोऽपि अस्माकं माता अस्ति। चिन्मयविद्यालये संस्कृते-संस्कृत्योः उमा शिक्षा दीयते इति अस्मभ्यम् सुखविषयः वर्तते।

अस्याः 'चिन्मय-निर्झरिणी' इति पत्रिकायाः संरचनायां सर्वेषां चिन्मय-संस्कृत - शिक्षकाणां/ शिक्षिकाणां, छात्राणाञ्चमहत् योगदानमस्ति। अतः तेभ्यः सर्वेभ्यः बहुशः वर्धापनम् धन्यवादाश्च। आशा विश्वासो चास्ति यत् एषा पत्रिका छात्रेभ्यः / छात्राभ्याः विशेषतः लाभप्रदा भविष्यति, तेषां रचना-कौशलेऽभिवृद्धिम् च करष्यिति, एवं तेषां प्रसन्नताकारिका उत्साहवर्धिका च भविष्यति। मन्ये यत् एषा पत्रिका अभिभावकिषु सुधी-पाठकेषु जपि उत्साहसंचारम् करिष्यति। आशासे यत् एषा पत्रिका संस्कृतभाषाम् प्रति सुरुच्योत्पादनम् करिष्यति येन अस्याः पत्रिकायाः प्रयोजनं सिद्धं भविष्यति।

अस्याः पत्रिकायाः चतुर्थाङ्कस्य प्रकाशनार्थमहं सम्पादकमण्डलस्य सर्वसदस्यान् प्रति कृतज्ञतां प्रकटीकरोमि, चिन्मयपरिवारस्य सर्वसदस्यान् प्रति शुभकामनां च ज्ञापयामि।

धन्यवादाः

# सम्पादकीय:

सर्वेभ्यः सप्रेम हरिः ॐ !

साहित्यम् समाजस्य दर्पणम् अस्ति। संस्कृताभिवृद्धि: यदि अपेक्ष्यते तर्हि संस्कृतक्षेत्रे अपि आधुनिकं सर्जनात्मकं साहित्यं अधिकतया सृष्टं भवेत् इति विषयं तु प्राय: अङ्गीकुर्वन्ति। एतया दृष्ट्या बहुविधा: प्रयत्न: सर्वत्र प्रचलन्त: सन्ति अपि। एतत् काले अस्माभि: एतदपि चिन्तनीयं यत् सृज्यमानं साहित्यं कालोचितम् अस्ति न वा।

वस्तुतः एषा पत्रिका सम्प्रति स्वबाल्यावस्थायामस्ति। अस्याः मुख्योद्देश्यः छात्राणां रचनात्मकप्रतिभानां सकारात्मकरुपप्रदानं, तेषाञ्च विचारसङ्गठनेन व्यक्तित्वपरिष्करणं वर्तते। अत्र विशुद्धा चिन्मयसंस्कृतिः अस्ति, भविष्यति च आगामिकाले। अत्र चिन्मय-दृष्टि-कार्यक्रमाः (cvp) विविधरुपेण रचनायां रुपाकृतिं गृह्णन्ति, ग्रहीष्यन्ति चैव। आशासे यत् एषा पत्रिका न केवलं छात्रहितानि साधयिष्यति, अपितु वृहद्पाठकवृन्दस्यापि हितसाधनाम् करष्यिति।

पत्रिकाया: सफलताया: दायित्वं सुधी पाठकानां उपरि भवति। भवन्त: निश्चयेन पत्रिकाया: सम्यक् मूल्याङ्कनं कृत्वा विविधपक्षानां उपरि सम्पादकमण्डलस्य मार्गदर्शनं करिष्यन्ति। मम एष: विश्वास: यत् पत्रिकाया: विषयवस्तु: भवताम् कृते लाभप्रदं ज्ञानप्रदं च कल्याणकरं अपि भविष्यति।

अस्याः सम्वर्धनाय परिवर्धनाय वा मतिमताम् पाठकानाम् सद्विचाराः परामर्शः वा सादरमामन्त्रयन्ते।


**संपादकमण्डलसदस्या:**

**शिक्षकमण्डली**

श्रीमती तिलोत्तमा कोचगवे

श्री गोपाल कृष्ण दूबे

श्री शुभेंदु मिश्रा

**बालमण्डली**

अंकित-सारंगी - 8B, प्राची सुमन - 8C, सोनाक्षी - 8B, शांभवी, 8B

प्रकाशक: - संस्कृतविभाग:,चिन्मयविद्यालय:, बोकारो, झारखण्ड:

# अनुक्रमणिका


| | | |
|---|---|---|
| लेखा: | | 1-3 |
| यक्ष:- युधिष्ठिर: संवाद | श्रीमती तिलोत्तमा कोचगवे शिक्षिका | 2 |
| शरीरमाद्यं खलु धर्मसाधनम् | श्रीमती गीतांजलि पण्डा शिक्षिका | 3 |
| बालकृतय: | | 4-8 |
| मम विद्यालय: | ऋषिता मल्लाह,6C | 5 |
| यत्र वनम् अस्ति | श्रीवत्स उपाध्याय:, 7D | 5 |
| स्वामी चिन्मयानंद: | गीतिका संयुक्ता, 6A | 5 |
| मम मातृभूमि: | शौर्य ठाकुर:, 6C | 6 |
| प्रकृति: | सिल्वी सृष्टि, 10C | 6 |
| विद्यालयस्य महत्त्वं | ऋत्विक कुमार:, 8E | 6 |
| संस्कृतभाषाया: उपयोगिता | सुहानी सिंह:, 8A | 7 |
| संस्कृतभाषाया: महत्त्वं | सिल्वी सृष्टि:, 10C | 7 |
| मम परिवार: | स्तुति सिंह:, 10D | 7 |
| भारतवर्ष: | तनिषा चौरसिया, 10D | 8 |
| बालरचना: | | 9-15 |
| बालप्रमोदिनी | | 16-23 |
| क्रियापदज्ञानम् | | 17-18 |
| षष्ठी-विभक्ति:-प्रयोग: | | 19 |
| सप्ताहम् | | 20 |
| संस्कृत-अव्यय-शब्दा: | | 21 |
| शब्दज्ञानम् | | 22 |
| ग्रहगति: | | 23 |
| चित्रावली | | 24-28 |
| संस्कृते उत्कृष्ट- प्रदर्शनं | | 29 |
| अग्रिमप्रत्या: मुखपृष्ठम् | | 30 |



# लेखाः

# यक्ष- युधिष्ठिरः- संवादः

– श्रीमती तिलोत्तमा कोचगवे
( शिक्षिका )

यक्ष उवाच

किं स्विद् आदित्यं उन्नयति के च तस्याभितश्चरा:।

कश्चैनं अस्तं नयति कश्मिंश्च प्रतितिष्ठति।।

अर्थ:

# क: सूर्यं उदेति ?के च तस्य परित: चलन्ति? क: तं अस्तं करोति ? सूर्य: कस्मिन् प्रतिष्ठित:?

युधिष्ठिर उवाच

ब्रह्मादित्यमुन्नयति देवास्तस्याभितसश्चरा:।

धर्मश्चास्तं नयति च सत्ये च प्रतितिष्ठति।।

अर्थ:

# ब्रह्म सूर्यं उदेति देवता: च तस्य परित: चलन्ति। धर्म: तं अस्तं करोति सूर्य: च सत्ये प्रतितिष्ठति।

यक्ष उवाच

किंस्विद् गुरुतरं भूमे: किंस्विदुच्चतरं च खात्।

किं स्विद् शीघ्रतरं वायो: किंस्विद् बहुतरं तृणात्।।

अर्थ:

# पृथिव्या: गुरुतरं किं अस्ति? आकाशात् उच्चतरं किं अस्ति? वायो: अपि शीघ्रतरं के चलन्ति? तृणात् अपि अधिकं किं?

युधिष्ठिर उवाच

माता गुरुतरा भूमे: खात् पितोच्चतरस्तथा ।

मन: शीघ्रतरं वातात् चिन्ता बहुतरी तृणात् ।।

अर्थ:

# मातु: गौरवं पृथिव्या: अधिकं अस्ति अत: माता पृथिव्या: गुरुतरा अस्ति। पिता आकाशात् उच्चतरं अस्ति। मन: वायो: शीघ्रतरं चलति। चिन्ता च तृणात् अपि अधिकं अनन्तं च अस्ति।

क्रमश:

# शरीरमाद्यं खलुधर्मसाधनम्

— श्रीमती गीतांजली पंडा, शिक्षिका

इदानीम् संसारे सर्वेषाणां मनुष्याणां जीवनं बहुसमस्यामयं दृश्यते । केचन जनाः शारीरिकव्याधिनापीडितः केचन मानसिकव्याधिनापीडितः च । जनाः सुखमयजीवनयापनस्य मार्गं विस्मतृवन्तः य़त् अस्माकम् पूर्वजाः अनुसृतवन्तः। सर्वे धनं अन्वेषणाय कार्यं कुर्वन्ति। केचन अपि कथयन्ति धनमेव सुखमस्ति। परन्तु

"अति सर्वत्र गर्हीतम्।" अस्माकम् शारीरिकसामथ्र्यानुसारं कार्यं करणीयम्। कालिदासेन रचितम् सप्तदशसर्गात्मक 'कुमारसम्भवम्' महाकाव्ये लिखितम् –

"अपि क्रीयार्थं सुलभं समित्कुशं।
जलान्य अपि स्नानविधिक्षमाणि ते।।
अपि स्वशक्त्या तपसि प्रवर्तसे।
शरीरमाद्यं खलुधर्मसाधनम्।।"

श्रीमद् भगवत् गीतानुसारं अस्माकम् कर्म एव धर्म। अतः धर्मसाधनम् करणीयम् परन्तु शरीरस्य य़त्न प्रतमम् कार्यं भवति। शरीरम् नास्ति चेत् कि धर्मं, कथम् धर्मं, किमर्थं धर्मं इति ।

उत्तमशरीरार्थम् य़ोगाभ्यासं उत्तमभोजनं उत्तमनिद्रा आदि अतीवआवश्यकम्।

उत्तमपुस्तकम् अवश्यम् पठनीयम् येन मानसिकसुस्थता अनुभवामः। प्रातः सायं प्रर्थना अपि वहुउपादेयः भवति। संस्कृतश्लोकाः शरीरार्थंबहुउपकारी भवन्ति।

अधुनातन करोनाकालविषये सर्वे जनन्ति। अधुना सर्वे गृहवन्दी।

एकमात्र कारणम् अस्ति शरीरसुरक्षा। इदानीम् चलदूरभाष्यन्तरस्य संगणकस्य च बहुप्रयोगं कुर्वन्ति। वयम् सर्वे सवनेत्रस्य सुरक्षार्थं नेत्रोपयोगी प्राणायामं अवश्यम् करणीयम्। स्वशरीरहितसाधनार्थम् योगाभ्यासः सर्वोत्तमः माध्यमः।

उत्तमशरीरं एव उत्तमकार्यसम्पादने सहायतां करोति। धर्मसाधनम् आर्थात् कार्यं जीवनव्यापी प्रक्रिया एतदर्थं आवश्यकम् सुस्थशरीर



# बालकृतयः

## मम विद्यालय:

मम विद्यालयस्य नाम चिन्मयविद्यालय: अस्ति।
मम विद्यालय: विशाल: सुंदर: च अस्ति।
अयं विद्यालय: बोकारो नगरस्य सेक्टर ५ क्षेत्रे स्थित:।
मम विश्वविद्यालयस्य आरम्भ: अष्टवादने भवति।
विद्यालये बहव: छात्रा: पठन्ति।
अस्मिन् विद्यालये अशीति: अध्यापका: सन्ति।
मम विद्यालये एकं समृद्ध: पुस्तकालय: अपि अस्ति।
मम विद्यालयस्य क्रीडाक्षेत्रम् अति विशालम् अस्ति।
अस्य मुख्याध्यापक: अतीव सुयोग्य: अनुशासनप्रिय: च अस्ति।
मम विद्यालयस्य परीक्षाफलं प्रशंसनीय भवति।

ऋषिता मल्लाह
6C

## यत्र वनम् अस्ति

यत्र वनम् अस्ति, तत्र धनम् अस्ति।
यत्र वनम् अस्ति, तत्र पवनम् अस्ति।
यत्र वनम् अस्ति, तत्र भ्रमणम् अस्ति।
यत्र वनम् अस्ति, तत्र जीवनम् अस्ति।
यत्र वनम् अस्ति, तत्र अद्य अस्ति।
यत्र वनम् अस्ति, तत्र श्व:अस्ति।
यत्र वनम् अस्ति, तत्र सर्वे: उपलब्धता: अस्ति।वृक्षा: अवश्यम् रोपणीय:।

श्रीवत्स उपाध्याय:
7D

## स्वामी चिन्मयानंद:

स्वामी चिन्मयानंद सनातन धर्मस्य संस्कृते: मूलभूतसिद्धांतस्य वेदान्तदर्शनस्य च प्रवक्ता स्म। तस्य महापुरुषस्य जन्म 1916 तमे वर्षे मई मासस्य अष्टमी तिथौ भारतदेशस्य दक्षिणभागे केरल राज्यस्य माननीय कुटुम्बे अभवत्।

अस्य बालस्य नाम बालकृष्णन इति। अस्य पिता आधुनिक न्याय विभागे न्यायाधीश: आसीत्। अस्मिन् एव समये स्वामिना शिवानन्देन प्रभावित:। बालकृष्णन तेन सन्यासदीक्षां स्वीकृतवान्। अनेन एव तस्य नाम स्वामी चिन्मयानंद: अभवत्।

1953 तमे वर्षे स्वामीजी चिन्मय मिशन इति संस्थानम् आरब्धवान्।

स्वामी चिन्मयानंद: 1993 वर्षे अगस्त मासे तृतीय दिवसे अमेरिका देशे साण्डियागो नगरे भौतिकं शरीरं त्यक्त्वान्।

गीतिका संयुक्ता
6A

## मम मातृभूमिः

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। मातृभूमिः जन्मतः आरभ्य मृत्युपर्यन्तम् अस्माकं रक्षणं पोषणं च करोति। माता भूमिः पुत्रोऽहं पृथिव्याः इति वेदवाक्यम् अस्ति। मातृभूमिः सर्वैः नरैः वन्दनीया भवति। येन केन प्रकारेण मातृभूमेः रक्षणं करणीयम्।

शौर्य ठाकुर

6C

## प्रकृतिः

प्रकृतिः माता सर्वेषाम्
बहूनाम् अपि फलानाम्
बहूनाम् अस्ति वृक्षाणाम्
पुष्पाणाम् चापि मातेयम्।

भ्रमरणां, पशूनां
पक्षिणां च मातास्ति
जनेभ्यः जीवनं सदा
ददाति प्रकृतिः माता।।

अस्ति सा तु मनोहरी
मातृणाम् अपि मातास्ति
प्रकृतिः माता सर्वेषाम्
नमोस्तु ते मात्रे प्रकृत्यै।।

सिल्वी सृष्टि

10 C

## विद्यालयस्य महत्त्वम्

विद्यार्थीजीवनस्य प्रारंभः शिशुविद्यालयात् भवति। तत् विद्यालयात् तत्पश्चात् च महाविद्यालयात् शिक्षां प्राप्नोति। विद्यालये छात्रान् विविधान् विषयान् पठन्ति। विद्यार्थीजीवने यादृशी शिक्षां प्राप्यते यान् संस्कारान् लभते तेषाम् उपयोगः समस्तजीवने सुखं भवति। विद्यालये छात्राणाम् शारीरिक मानसिक बौद्धिक आध्यात्मिक योग्यताविकासाय अहर्निशं प्रयतते। विद्यालयः छात्रः देशस्य आदर्शः नागरिकः रचयति। विद्यालये छात्राणाम् सत्यस्य पाठः पठन्ति। विद्यालयः अस्माकं गौरवास्पदम् अस्ति।

ऋत्विक कुमार

8E

# संस्कृतभाषायाः उपयोगिता

**देवभाषा वेदभाषा च भवति संस्कृतं। सम्यक् कृतं इति संस्कृतं। इयं भाषा देववाणी इति कथ्यते। वेदाः , रामायणः , महाभारतः , भगवद् गीता इत्यादि ग्रन्थाः संस्कृतभाषायां एवं विरचितानि। सर्वासु भाषासु अपेक्षया संस्कृतभाषायां अधिकपदानि सन्ति। इयं भाषा वैद्यशास्त्रेष्वपि उपयुज्यति।इयं भाषायाः महत्वं विदेशराज्येष्वपि प्रसिध्दं।परन्तु अद्य एतम् भाषायाः स्थिति अत्यन्तं शोचनीयं ।भारतदेशे संस्कृतं मृतभाषा इति ज्ञातः। जनाः संस्कृतविषये तत्परः नास्ति ।संस्कृतभाषायाः संरक्षणार्थं वयं संस्कृतपठनं प्रचरणं च अवश्यं करणीयं ।संस्कृतभाषा अनेकासां भाषाणां जननी मता ।संस्कृत भाषा एव भारतवर्षम् एकसूत्रे बध्नाति ।**

**- सुहानी सिंह ,८/अ**

# संस्कृत भाषायाः महत्त्वम्

संस्कृत भाषा सर्वप्राचीना भाषा अस्ति।
संस्कृत भाषा विश्वबंधुत्वस्य पोषणं करोति।
भारतीयैकता साधकं संस्कृतम् अस्ति।
संस्कृतं विश्वस्य महत्तमा भाषा अस्ति।
संस्कृतभाषैव भारतस्य प्राणभूता भाषा अस्ति।

सिल्वी सृष्टि
10 C

# मम परिवारः

मम परिवारे पञ्च जनाः निवसन्ति। मम पितुः वयः पञ्चचत्वारिंशत् अस्ति। सः संविदाकारः अस्ति। मम मातुः वयः द्वाचत्वारिंशत् अस्ति। सा गृहिणी अस्ति। अहं चिन्मयविद्यालये दशमी कक्षायां पठामि। मम अनुजा निशा अपि अत्रैव अष्टम्यां कक्षायां पठति। यस्मिन् गृहे सर्वे सदस्याः मिलित्वा वसन्ति, परस्परं सम्मानं स्नेहं च कुर्वन्ति, सः परिवारः कथ्यते। मम  गृहे सर्वे प्रसन्नाः।


स्तुति सिंहः, 10D




## भारतवर्षः

अस्माकं देशः
भारतवर्ष अस्ति।
अस्माकं देशः संसारस्य देशेषु अति पुरातन
देशः अस्ति।
इदम् एशिया महाद्धीपे स्थितः अस्ति।
भारतस्य स्वतन्त्रतादिवसम् अगस्त
मासस्य पंचदशे दिनाङ्के भवति।
भारतदेशस्य राजधानी दिल्लीनगरम्
अस्ति।
भारतस्य संविधानरीत्या राष्ट्रभाषा किमपि
नास्ति।
भारतस्य संविधानरीत्या राष्ट्रभाषा किमपि
नास्ति।
भारतस्य मुद्राः रुपया अस्ति।
एतस्य राष्ट्रगीतः 'जन गण मण अस्ति।
भारतः विश्वस्य सप्तम विशालः देशः अस्ति।
अस्माकं देशे अनेके प्रदेशा सन्ति।
भारतः एकाधिकातयाम् एकतायाः उपरि विश्वासम्
करोति।

नाम - तनिषा चौरसिया
कक्षा - 10 /डी



# बालरचनाः




आकृति सिंह, 6C




ऋषिता मल्लाह, 6C



ऋषिता मल्लाह, 6C



शाम्भवी 8/B



आकृति सिंह, 6C




आकृति सिंह, 6C




अग्रिमा सिंह, 5C



आदित्य चौधरी, 7A



मोहित



अग्रिमा सिंह, 5C



शाम्भवी 8/B



शाम्भवी 8/B



शाम्भवी 8/B



आदित्य चौधरी, 7A



शाम्भवी 8/B




शाम्भवी 8/B





अनुष्का, 6C



अनिशा मंडल, 10F



आन्या राज, 5B




अदिति सिंह, 5F


तन्वी गुप्ता, 6D


सौम्या,10C


ऋत्विक कुमार, 8A




अनुष्का कुमारी, 7A




शानवी पोलू, 8A




हिराल बम, 7G



लाइलिन पटेल,6C




अर्णव राज, 6B





प्रियांशु कुमार, 5C




भूमि सिंह



यशदीप सिंह,5A



ऋषिता मल्लाह,6C


बालप्रमोदिनी

# क्रियापदप्रयोगः



बालकः स्नाति।



बालकः वमति।



बालकः तरति।



बालकः हसति।



बालकः क्रन्दति।



बालकः सिञ्चति।



बालकः गायति।



बालकः नृत्यति।



बालकः पठति।

# क्रियापदप्रयोगः


बालकः क्रीडति।


बालकः लिखति।


बालकः धावति।


बालकः खादति।


बालकः शृणोति।


बालकः उपविशति।


बालकः गच्छति।

# षष्ठी-विभक्तिः-प्रयोगः



एषः कृष्णः।

कृष्णस्य पितुः नाम ..............



एषः श्रीरामः।

श्रीरामस्य पितुः नाम .............



एषः विष्णुः।

विष्णोः भार्यायाः नाम ............



एषः शङ्करः।

शङ्करस्य भार्यायाः नाम .........



एषः गणेशः।

गणेशस्य मातुः नाम ..............



एषः हनुमान् ।

हनुमतः मातुः नाम ................


सप्ताहम्
Monday
सोमवासरः
Tuesday
मङ्गलवासरः
Wednesday
बुधवासरः
Thursday
गुरूवासरः
Friday
शुक्रवासरः
Saturday
शनिवासरः
Sunday
रविवासरः

# संस्कृत-अव्यय-शब्दाः

Indeclinabes related to days

अद्य

Today

ह्यः

Yesterday

श्वः

Tomorrow

परह्यः

Day before yesterday

परश्वः

Day after tomorrow

प्रपरह्यः

Day before the day before yesterday

प्रपरश्वः

Day after the day after tomorrow

# शब्दज्ञानम



हैमी



कुण्डलिनी



पिण्डः



दुग्धपूपिका



रसगोलः



मधुरपिष्टकम्



मोदकम्



समोषः



वर्तुलम्

# ग्रहगतिः
# Planetary Motion

कक्ष्याप्रतिमण्डलगा भ्रमन्ति सर्वे ग्रहाः स्वचारेण ।
मन्दोच्चादनुलोमं प्रतिलोमं चैव शीघ्रोच्चात् ।।

- (आर्यभटीयम्-कालक्रियापादः - ३.१७ [499 CE])

***The mean planets move on their orbits and the true planets in eccentric circles. All the planets whether moving on their orbits or in eccentric circles move with their own motion, anti-clockwise from their Apogees and clock-wise from their Perigees.***



**[Aryabhata stated this law in the 5th century AD, much before the first law of planetary motion was given by Johannes Kepler in 17th century CE.]**

# चित्रावली




# वृक्षारोपणम्




च्छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।
फलान्यापि परार्थाय वृक्षाः सत्पुरुषाः इव ॥

नमन्ति फलिनो वृक्षा नमन्ति गुणिनो जनाः ।
शुष्ककाष्ठश्च मूर्खश्च न नमन्ति कदाचन ॥



# कार्यकलापस्य चित्राणि



















# कार्याकलापस्य चित्राणि









नाम- ऋषिका
क्रमांक -15404
कक्षा - 5/A


ॐ
संस्कृत

Date - 13/05/2021
Day- Thursday

एषा बालिका अस्ति।
सा पठति लिखति च।
सा ऑन-लाइन कक्षा करोति।
सा खेलति हसति च।
सा नमति।
सा द्राक्षाफलं खादति।
सा गायनं अपि करोति।
माता-पिता स्नेहं करोति।

# संस्कृत ओलंपियाड इति परीक्षायां विद्यालयस्य प्रदर्शनं-2020-21

## झारखण्डे प्रथमं स्थानं



अन्वी आनंद:.6F



**संस्कृत ओलंपियाड में बोकारो की आण्वी पूरे राज्य में अव्वल**

संवाददाता

**बोकारो ।** चिन्मय विद्यालय, बोकारो की मेधावी छात्रा आण्वी ने संस्कृत ओलंपियाड में पूरे झारखंड में पहला स्थान प्राप्त कर राज्य की शैक्षणिक राजधानी बोकारो का नाम एक बार फिर विश्व फलक पर रोशन किया है। कक्षा-6 की छात्रा आण्वी आनंद ने अपनी बुद्धिमता का परिचय देते हुए छठे संस्कृत ओलंपियाड में राष्ट्रस्तर पर पांचवां एवं राज्य स्तर पर प्रथम स्थान प्राप्त कर चिन्मय विद्यालय, बोकारो, एवं राज्य तथा देश का मान बढ़ाया। उसकी इस उपलब्धि पर विद्यालय के प्राचार्य अशोक कुमार झा ने उसे प्रशस्ति पत्र देकर सम्मानित किया। साथ ही उसके उज्जवल भविष्य की कामना की। चिन्मय मिशन, बोकारो की आचार्या स्वामिनी संयुक्तानंद सरस्वती, चिन्मय विद्यालय अध्यक्ष विश्वरूप मुखोपाध्याय, सचिव महेश त्रिपाठी आदि ने भी अपनी शुभकामनाएं दीं। प्राचार्य झा ने कहा कि विद्यालय छात्र-छात्राओं के विकास को लेकर हमेशा से सर्वांगीण विकास को लेकर तत्पर रहा है।

अन्वी आनंद:.6F

## झारखण्डे तृतीयं स्थानं



अनुष्का आर्या, 6F



स्वास्तिका सौम्या, 6F

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।

न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।

Without rigorous efforts nothing can be accomplished. Just like a deer does not enter a lion's mouth on its own without him going for a hunt.

# हार्दिक्याः शुभाशयाः


चिन्मय
निर्झरिणी
अग्रिमा प्रति कृते अधोलिखितअणुसङ्केतस्य उपरि
स्वरचनां प्रेषयन्तु
अणुसङ्केतम्- cvbokaronirjharni.2019@gmail.com
चिन्मयविद्यालयः, बोकारो, झारखण्डः